**दिनाङ्क :- 29.05.2024**
**सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- लोकसभा निर्वाचनस्य अन्तिम चरणाय प्रचाराभियानं सजवं प्रवर्तते। यतोहि मतदानाय दिनद्वयमेव अवशिष्टमस्ति।
- सर्वोच्च न्यायालयस्य पंजीयन कार्यालयेन अद्य नवदिल्ल्या: मुख्यमंत्रिण: अरविन्द केजरीवालस्य अन्तरिमा प्रतिभूति: अस्वीकृता।
- छत्तीसगढ़ बीजापुरजनपदे सुरक्षाबलेन एकामहिला नक्सलवादी, द्वौ च माओवादिनौ मारितौ।
- ऋतु-विज्ञान-विभागेन पश्चिमोत्तर-मध्य-भारते च प्रवर्तमाने भीषणातपे श्वः आरभ्य शनैः शनैः न्यूनतायाः अनुमानः प्रकटितः।
- सर्बिया देशीयः टेनिस् क्रीडकः नोवाकः जोकोविचः फ्रेंच ओपन टेनिस स्पर्धा मालिकायाः द्वितीयं चक्रं सम्प्राप्तः।

**अथ वार्ता: विस्तरेण**

**प्रचार अभियान**

लोकसभा निर्वाचनस्य अन्तिम चरणाय प्रचाराभियानं सजवं प्रवर्तते। यतोहि मतदानाय दिनद्वयमेव अवशिष्टमस्ति। एतस्मिन् सप्तमे चरणे सप्तराज्यानां केन्द्रशासितप्रदेशानां च सप्तपञ्चाशत् आसनेभ्य: मतदानं जूनमासस्य प्रथमे दिनांके भविष्यति। पश्चिमबंगालस्य मथुरापुरे एकां जनसभां सम्बोधयन् श्रीमोदी प्रोक्तवान् यत् अद्य जगति सर्वे भारतं आदरपूर्वकं पश्यन्ति। भवतु नाम अमेरिका, यूरोप:-जापानं वा। श्रीमोदी अवदत् यत् एतत् तदा सम्भवं यदा जनै: केन्द्रे भाजपा नेतृत्वे एन.डी.ए. इति सर्वकाराय मतदानं कृतम्। निजप्रशासनस्य उपलब्धीनां गणनां कुर्वन् प्रधानमंत्री प्रोक्तवान् यत् विगत दशवर्षेषु केन्द्रसर्वकारेण चतु: कोटिभ्य: निर्धनजनेभ्य: आवास भवनानि प्रदत्तानि, अपि च द्वादशकोट्यधिक गृहेषु जलव्यवस्था च कृता:।

**षष्ठ चरण मतदानं**

लोकसभा निर्वाचनस्य षष्ठे चरणे महिला मतदातृणां संख्या: पुरूषाणाम् अपेक्षया त्रिप्रतिशतात्मिका अधिका आसीत्। ह्य: निर्वाचनायोगेन एतत् विवरणं प्रख्यापितम्। मतदान पर्यवेक्षण दलेन शनिवासरे आयोजितस्य लोकसभा निर्वाचनस्य

षष्ठचरणस्य मतदातृणां पूर्ण-संख्या-प्रकाशिता। प्रतिवेदनानुसारं पञ्चषष्ठि: प्रतिशन्मिता: महिला मतदातार: निज मताधिकारस्य प्रयोगं कृतवत्य:। अपरत: द्विषष्टि-प्रतिशन्मिता: पुरूष मतदातार: निज मताधिकारस्य प्रयोगं कृतवन्त:। एतददतिरिच्य तृतीय लिङ्गस्य मतदातृणां प्रतिशतं ऊनविंश-मितं परिलक्षितम्। एतत् विवरणं निर्वाचन-प्रक्रियायां जनभागितां सूचयति। बिहार-झारखण्ड, लद्दाख, ओडिशा, उत्तरप्रदेश चेत्यादिषु राज्येषु पुरुषमतदातृणां अपेक्षया महिलामतदातृणां संख्या: अधिका: आसीत्। ध्येयास्पदं वर्तते यत् अस्य मासस्य पञ्चविंशे दिनांके अष्ट राज्यानां अष्ट पञ्चाशत् आसनेभ्य: मतदानं सञ्जातम्।

**एस.सी.-केजरीवाल**

सर्वोच्च न्यायालयस्य पंजीयन कार्यालयेन अद्य नवदिल्ल्या: मुख्यमंत्रिण: अरविन्द केजरीवालस्य अस्थायी प्रतिभूते: सप्त दिवसं यावत् समेधनानां सूचीबद्धां कर्तुं अस्वीकृतम्। श्रीकेजरीवालेन निज चिकित्सा परीक्षणं कर्तुं एषा याचिका पञ्जीकृता आसीत्। केजरीवालस्य आवेदनं अस्वीकुर्वन् सर्वोच्च न्यायालयस्य पंजीयन कार्यालयेन प्रोक्तं यत् स: उच्च न्यायालयस्य पार्श्वे गन्तुं स्वतन्त्र: अस्ति।

**छत्तीसगढ़**

छत्तीसगढ़स्य बीजापुरजनपदे सुरक्षाबलेन एकामहिला नक्सलवादी द्वौ च माओवादिनौ मारितौ। अयं संघर्ष: अद्य प्रात: बड्डेपाराया: वनेषु सञ्जात:। संघर्षे या महिला मारिता तस्या: उपरि अष्ट लक्षरूप्यकाणां पारितोषिकं आसीत्।

**ऋतुविज्ञानविभागः**

ऋतु-विज्ञान-विभागेन पश्चिमोत्तर-मध्य-भारते च प्रवर्तमाने भीषणातपे श्वः आरभ्य शनैः शनैः न्यूनतायाः अनुमानः प्रकटितः। भीषणातपस्य स्थितिः श्वः यावत् जम्मू-हिमाचलप्रदेश-पंजाब-हरियाणा-चण्डीगढ-दिल्ली-उत्तरप्रदेश-मध्यप्रदेश-छत्तीसगढ-बिहार-ओडिशा राज्येषु एवमेव प्रवर्तिस्यते। पश्चिमोत्तर-मध्य-भारते अद्य अधिकतम-तापमाने किञ्चित् महत्त्वपूर्णं परिवर्तनं नैव भविष्यतीति अनुमीयते। एतेषां क्षेत्राणां तापमाने आगामि-दिनेषु द्वि-त्रि-मिता अपचितेः आशा विद्यते।

**पूर्वोत्तरचक्रवातः/रेमल:**

भीषण-तापानन्तरं साम्प्रतं रेमल-चक्रवात-कारणात् अतिवृष्ट्या भूस्खलनैः च सम्पूर्णे अपि पूर्वोत्तर-भारते जनजीवनं पर्याकुलितं संवृत्तम्। ऋतु-विज्ञान-विभागेन पूर्वोत्तर-भारतस्य विभिन्न-राज्यानां कृते रक्त-वार्णिकी संचेतना प्रसारिता अस्ति, यत्र गतासु चतुर्विंशतिसु होरासु चक्रवात-कारणात् न्यूनातिन्यूनं त्रयस्त्रिंशत् जनाः मृत्युम् उपगताः। अद्य असमस्य मुख्यमन्त्री डॉ. हिमन्त-विश्व-सरमा नागांव, होजै, कार्बी- आंगलांग, गोलाघाट, दीमा,हसाओ, काचर, हैलाकाण्डी, करीमगंज इत्येतेषु जनपदेषु सर्वाणि अपि शिक्षण-संस्थानानि पिधातुम् आदिष्टवान्। निरन्तरवृष्ट्या संजातैः भूस्खलनैः उत्तरीय-असमेन भारतस्य शेषभागैः च बराक-उपत्यकायाः, त्रिपुरायाः, मणिपुरस्य, मिजोरमस्य च मार्गसम्बन्धः सम्प्रति विच्छिन्नः अस्ति। बराक-उपत्यकायां जलाप्लाव-स्थितिः समुत्पन्नास्ति।

**उपराष्ट्रपति जगदीप धनखड़:**

उपराष्ट्रपति जगदीप धनखड़: श्व: उत्तराखण्डे एकदिवसीयां यात्रां करिष्यति। स: कैंची धाम्नि नीम करौली बाबा इत्याख्ये पवित्र स्थले गमिष्यति। अस्यां यात्रावधौ स: पंतनगरस्थ गोविंद वल्लभ पंत कृषि प्रौद्योगिकी विश्वविद्यालये एकं सम्मेलनं अपि संबोधयिष्यति।

**जयशंकर**

विदेश मंत्री डॉ. एस. जयशंकर: अद्य संयुक्त राष्ट्रस्य अन्तर्राष्ट्रिय शान्तिरक्षक दिवस मालक्ष्य जनेभ्य: शुभकामना: प्रदत्ता:। असौ एकस्मिन् सामाजिक अन्तर्जालीयपटले वीरपुरूषाणां महिलानां च कृते तेषां शान्तिरक्षणाय, सुरक्षाकरणाय योगदानाय च वर्धापिता:।

**उपराज्यपाल वी के सक्सेना**

दिल्ल्याः उपराज्यपालेन वीके-सक्सेना इत्यमुना राष्ट्रिय-राजधान्यां भीषणातपं निध्याय मध्याह्ने द्वादश वादनात् अपराह्ने त्रिवादनं यावत् निर्माण-स्थलेषु कार्यरतेभ्यः श्रमिकेभ्यः वेतनिकावकाशस्य आदेशः प्रदत्तः। श्री सक्सेना वर्येण मुख्य -सचिवं नरेशकुमारम् अस्मिन् लोकनिर्माण-विभागस्य अधिकारिभिः सह तात्कालिकोपवेशनस्य निर्देशः प्रदत्तः।

**बाहुमल्ल-स्पर्धा-मालिका**

उज्बेकिस्तानस्य ताशकंदे एशिया आर्म रेसलिंग चैम्पियनशिप इत्येतस्यां बाहुमल्ल स्पर्धा मालिकायां भारतेन एकं सौवर्णं षट् कांस्यं च समेत्य आहत्य सप्त पदकानि जितानि। श्रीमंत-झा श्रेणि-द्वये एकं स्वर्णपदकं एकं कांस्यं च पदकं जितवान्। 'मास्टर्स' इत्यस्मिन् वर्गे लक्ष्मण सिंह भंडारी कांस्यपदक-द्वयम् अलभत। सचिन गोयलेन वरिष्ठे वर्गे कांस्यं पदकं जितम्। अत्रान्तरे, महिलानां प्रतियोगितासु अरुणाचल प्रदेशस्य इबी लोलेनः कांस्यपदक-द्वयं जितवती।

**फ्रेंच्-ओपन्-स्पर्धा/जोकोविचः**

सर्बिया देशीयः टेनिस् क्रीडकः नोवाकः जोकोविचः गतरात्रौ पेरिसे आयोजिते द्वन्द्वे सारल्येन विजयम् अवाप्य फ्रेंच ओपन टेनिस स्पर्धा मालिकायाः द्वितीयं चक्रं सम्प्राप्तः। सप्तत्रिंशत् वर्षीयः जोकोविचः द्वितीये चक्रे स्पेन देशीयं प्रतिद्वन्द्विनं रॉबर्टो कार्बालेस बेना इत्येतं सम्मुखीकरिष्यति। जोकोविचस्य एषा पञ्चविंशति-तमी ग्रैंड स्लैम स्पर्धा भविष्यति।